शब्दाकाशस्थायिता नित्यमित्यभिधानात् यावत्प्रलयपर्य्यन्तस्थायिता प्राणापानादेरपि तथैव नित्यत्वाभ्युपगमात्। न तु क्षणिकता मध्ये उत्पत्तिविनाशकल्पने गौरवात् शब्दार्थयोर्नित्यसम्बन्धस्वीकारादनित्येन शब्देन नित्यार्थसम्बन्धस्वीकारेऽयुक्तत्वापत्तेश्च। नित्यत्वेऽपि तेषां व्यञ्जकसद्भावाभावाभ्यां प्रत्ययाप्रत्ययावित्यन्यत्र विस्तरः। स्थानेषु कण्ठताल्वाद्यष्टस्थानेषु वायौ मूलाधारस्थे विक्षते विवक्षाप्रेरितमनोनियुक्ताग्निसंक्षोभाच्चलिते इत्यर्थः। कृतवर्णपरिग्रहा वर्णभावापन्ना, तच्च स्थानेष्विति व्यवहितेनान्वितम्। प्राणवृत्तिनिबन्धिनीत्यनेन प्राणवृत्तेर्वायोस्तत्तद्देशपर्य्यन्तगमनमभिहितं, केवलमित्यनेन कण्ठताल्वादिस्थानानपेक्षाभिहिता। बुद्ध्युपादानेत्यनेन हृदयस्थानगमनमुक्तं बुद्धेर्हृदयस्थत्वात्। संहृत: संहृतक्रमेत्यनेन हृदयस्थानगमनानपेक्षाभिहिता। अविभागेत्यनेन मध्यमाया विभागरूपविशेषस्य कर्णपिधानेनावगमात् पश्यन्त्यास्तु तद्व्युदासः। अनपायिनी स्वस्थानादचलिता प्राणापानान्तरे मूलाधारस्थितेति यावत्। अतो यथाप्रदर्शितं परादीनां विभागं प्रतिपादयतीदं महाभारतीयमलं विस्तरेण।"

"अभिघातस्थानानि चाष्टविधानि सामान्यतो वेदितव्यानि "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु चेति" शिक्षाद्युक्तेः। वर्णाश्च मतभेदेन त्रिषष्टिश्चतुःषष्टिर्वा शिक्षायामभिहिता वेदितव्याः। यथा "चतुःषष्टिस्त्रिषष्टिर्वा वर्णाः सम्भवतो मताः। स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च +कँ पौ चापि पराश्रितौ। दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव चेति"। अस्यार्थः अ इ उ ऋ इत्येषां ह्रस्वदीर्घप्लुताः कालकृता द्वादश भेदाः लृकारस्यैको भेदोऽस्य दीर्घाभावात् प्लुतस्तूत्तरं प्रतिपादितः। एचां चतुर्णां ह्रस्वाभावात् दीर्घप्लुतभेदेनाष्टौ भेदाः इत्येकविंशतिः स्वराः। स्पर्शाः कादयो मावसानाः पञ्चविंशतिः। यादयो हान्ता अष्टौ। यमाः वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये पूर्वसदृशाः प्रातिशाख्ये प्रसिद्धाश्चत्वारो वर्णाः। यथा पलिक्ँक्नी चख्ँख्नतुः। अग्ँग्निः। पतिघ्ँघ्नीत्यादौ। अनुस्वारादयश्चत्वारः स्पष्टाः। +कँ पौ चापि पराश्रितावित्युक्तिस्तु कखयोः परयोरेकविधः पफयोः परयोरन्यविधः कण्ठ्यौष्ठ्यत्वभेदादिति ज्ञापनाय। दुःस्पृष्टः ईषत्स्पृष्टः लृकारः। "अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथा" इत्यनेन प्रतिपादितस्य यणपदाभिधेययवरलो धर्मस्य ईषत्स्पृष्टत्वस्य लृकारे कथनात् लृकारस्य स्वरत्वयणत्वोभयधर्मसमावेशात् द्विविधता इति त्रिषष्टिर्भेदाः। लृकारस्य प्लुतत्वे चतुःषष्टिर्भेदाः। एवं वर्णानां सामान्यतो भेदे बोधिते एतेषामुत्पत्तिस्थानानि बाह्याभ्यन्तरप्रयत्नभेदाश्च प्रदर्श्यन्ते। तत्र स्थानानि "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्। कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू। स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः। जिह्वामूले तु कुः प्रोक्तः दन्त्योष्ठ्यो वः स्मृतो बुधैः। ए ऐ तु कण्ठ्यतालव्यावोऔ कण्ठ्योष्ठजौ स्मृतौ। अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत्। ओकारौकारयोस्तद्वदिति"। "अनुस्वारयमानाञ्च नासिका स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्थानभागिन इति शिक्षाद्युक्तानि वेदितव्यानि। यद्यपि सर्वेषां वर्णानामुच्चारणे कण्ठव्यापार आवश्यकस्तथापि चकाराद्युच्चारणे ताल्वादिव्यापारोऽप्यपेक्षित इति तन्मात्रामात्रकृतत्वेन वर्णानां वैलक्षण्यम्। "जिह्वामूले तु कुः प्रोक्तः" इति पाणिनिशिक्षाभिधानात् कवर्गस्य कण्ठ्यत्वव्यवहारस्तु कण्ठशब्दस्य कण्ठमूलपरतया भाक्त एव तवर्गस्य दन्तमूलीयत्वेन दन्त्यत्ववत् अन्यथा भग्नदन्तस्य तदनुच्चारापत्तेः। जिह्वामूलीयस्य आश्रयस्थानभागित्वेन तदाश्रयस्य कोरपि जिह्वामूलस्थानत्वौचित्यात्। दन्त्योष्ठ्यो व इत्यादावुभयोरेव प्रत्येकं वकारस्थानत्वं न तु समुदितयोः तथा सति दन्त्योष्ठ्य इत्येव परिशिष्येत। अतस्तस्य दन्त्यौष्ठ्योभयकार्य्यनिमित्तता एवमन्यत्रापि द्रष्टव्यम्। यमानां प्रातिशाख्यप्रसिद्धानां कँ आदिचतुष्टयानां पूर्वोदितानां यमसंज्ञाबोधितानाञ्च नासिकापि स्थानमधिकमुपदिश्यते। तत्र च यमेत्युपलक्षणम्। "अमोऽनुनासिका नह्रौ" इत्युक्त्या हकाररकारभिन्नानाममानां नासिका स्थानत्वाभिधानात् नासामनुगतः स्थानत्वेनेत्यनुनासिकशब्दव्युत्पत्त्या नासिकास्थानत्वप्राप्तेश्च। तत्र नह्राविति पुनः हकाररकारयोः पर्य्युदासः। "मुखनासिकावचनोऽनुनासिकः" इति पा॰ सूत्रे मुखपदस्य कण्ठादितत्तत्स्थानपरतया